दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ शरद्-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदशुक्लषष्ठी
आश्विन् 01 प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-10 ■ वर्ष-5 ■ अङ्क-328 | 1 | सितम्बर 17, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 संस्कृतगीतप्रतियोगितायां सिरमौरस्याधिपत्यम्, अवनीतकौरः प्रथमे स्थाने, अभिनवराणा च द्वितीयं स्थानं प्राप्तवान्

4 उत्तरप्रदेशमन्त्रिमण्डले २३ प्रस्तावाः अनुमोदिताः; मथुरायां २०० कोटिरूप्यकाणां व्ययेन एथेनॉलसंयन्त्रम्, अलीगढनगरे नूतनविश्वविद्यालयस्य स्थापना

8 कृषकेभ्यः सर्वकारीय-योजनानां लाभ-प्रदानम् अस्माकं प्राथमिकता; कृषि-राजस्व-सहकारिता-विभागाः मिलित्वा करिष्यन्ति कार्यम्

## अद्यतनीयं सुभाषितम्

**आतुरे नियमो नास्ति बाले वृद्धे तथैव च।।**
**पराचाररते चैव एष धर्मः सनातनः।।**

भावार्थः- रोगी, आपत्ति में पडे हुए, बालक तथा वृद्ध व्यक्ति और उसी तरह दूसरों की सहायता में लगे हुए व्यक्तियों के लिये सामान्य परिस्थिति में व्यवहार किए जाने वाले सामाजिक नियमों का पालन करना आवश्यक नहीं है। यही सनातन धर्म की मान्यता है।

# केन्द्रीय-मन्त्रिमण्डलेन कर्मचारि-भविष्य-निधि-सङ्घटने अनिवार्य-अंशदानाय विहिता मासिक-वेतन-सीमा वर्धिता







## ईपीएफओइत्यस्य अन्तर्गतं वेतनसीमा १५,००० तः २५,००० रुप्यकाणि यावत् वर्धिता

**नवदेहली १६ सितंबर २०२६**
**हिमसंस्कृतवार्ताः- डॉ विमलेश झा ।** केन्द्रीयमन्त्रिमण्डलेन कर्मचारीभविष्यनिधिसङ्गठनस्य (EPFO) अन्तर्गतं अनिवार्य-आवरणस्य वेतनसीमा १५,००० रुप्यकेभ्यः वर्धयित्वा २५,००० रुप्यकाणि प्रतिमासं कर्तुं स्वीकृतिः प्रदत्ता। अस्य निर्णयस्य प्रभावः बहूनां कर्मचारिणां वेतनस्य सामाजिकसुरक्षायाः च उपरि भविष्यति। सूचनाप्रसारणमन्त्री श्री अश्विनीवैष्णवः अवदत् यत् केन्द्रसर्वकारेण कर्मचारीभविष्यनिधिसङ्गठनस्य अन्तर्गतं अनिवार्य-आवरणाय वेतनसीमां १५,००० रुप्यकेभ्यः २५,००० रुप्यकाणि प्रतिमासं यावत् वर्धयितुं अनुमोदनं कृतम् अस्ति। वर्तमानं १५,००० रुप्यकाणां सीमामानं २०१४ तमस्य वर्षस्य सितम्बरमासात् प्रवर्तते। सर्वकारेण द्वादशवर्षाणाम् अनन्तरम् अयं परिवर्तनात्मकः निर्णयः कृतः। अन्तिमवारं २०१४ तमस्य वर्षस्य सितम्बरमासे वेतनसीमा ६,५०० रुप्यकेभ्यः १५,००० रुप्यकाणि यावत् वर्धिता आसीत्। ततः पूर्वं २००४ तः २०१४ पर्यन्तं अस्यां सीमायां परिवर्तनं न कृतम् आसीत्। सर्वकारस्य कथनानुसारं अस्मिन् अवधौ कर्मचारिणां वेतनस्तरे, आये तथा औपचारिक जीविकोपार्जनक्षेत्रे च पर्याप्तः परिवर्तनः अभवत्। अतः वर्तमानपरिस्थितीनाम् अनुरूपं ईपीएफओ वेतनसीमायाम् अपि संशोधनं कृतम्।
अनेन बहूनां कर्मचारिणां सामाजिकसुरक्षायाः लाभः भविष्यति।अद्यावधि १५,००० रुप्यकाणाम् अधिकं मासिकवेतनं प्राप्तवतां नूतनकर्मचारिणां अनिवार्य-ईपीएफआवरणे स्वयमेव समावेशः न भवति स्म। नूतनसीमायाः प्रवर्तनानन्तरं १५,००० तः २५,००० रुप्यकाणि यावत् मासिकवेतनं प्राप्तवन्तः बहवः कर्मचारिणः ईपीएफओ इति अन्तर्गतायां अनिवार्यसामाजिकसुरक्षाव्यवस्थायां सम्मिलिताः भविष्यन्ति।
अनेन आयवर्गस्य कर्मचारिभ्यः भविष्यनिधि-सञ्चयस्य, कर्मचारी-पेन्शन-योजनायाः तथा ईपीएफसम्बद्धस्य बीमासुरक्षायाः (ईडीएलआई) लाभस्य मार्गः प्रशस्तः भविष्यति। तथापि एतासां योजनानां पृथक्-पृथक् नियमाः पात्रताश्च प्रवर्तन्ते।प्रत्येकं कर्मचारिणः भविष्यनिधि-अंशदानं २५,००० रुप्यकाधारितं न भविष्यति।अत्र विशेषतः ज्ञातव्यं यत् २५,००० रुप्यकाणां नूतनवेतनसीमा इत्यस्य अर्थः नास्ति यत् प्रत्येकं कर्मचारिणः भविष्य निधिअंशदानं २५,००० रुप्यकाणाम् आधारेण एव निर्धारितं भविष्यति। अयं निर्णयः मुख्यतः कर्मचारी भविष्य निधि संगठनान्तर्गतस्य अनिवार्य-आवरणस्य वेतनसीमायाः विस्तारसम्बद्धः अस्ति। वास्तविकं भविष्य निधि-अंशदानं कस्य वेतनघटकस्य आधारेण तथा कस्य सीमायाः अनुसारं भविष्यति, तस्य निर्धारणं प्रचलितैः कर्मचारी भविष्य निधि संगठननियमैः भविष्यति। अतः १५,००० रुप्यकेभ्यः अधिकं वेतनं प्राप्तवतां कर्मचारिणां हस्तगतवेतनं अस्य निर्णयेन निश्चितरूपेण तत्क्षणं न्यूनं भविष्यति इति न वक्तुं शक्यते। अंशदानस्य वास्तविकगणना प्रवर्तमाननियमानुसारमेव भविष्यति।अनेन सर्वकारस्य व्ययः अपि वर्धिष्यते। नूतनवेतनसीमायाः कारणेन सामाजिकसुरक्षाव्यवस्थायां अधिकानां कर्मचारिणां समावेशः भविष्यति। तेन ईपीएफ, ईपीएस तथा सम्बद्धसामाजिकसुरक्षालाभानां क्षेत्रे सर्वकारस्य दायित्वे तथा व्यये अपि प्रभावः सम्भावितः अस्ति। सर्वकारस्य अतिरिक्तव्ययस्य वास्तविकराशिः सम्बन्धितनियमेषु तथा विस्तृतवित्तीयव्यवस्थायां निर्भरा भविष्यति।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

## कर-नीति-चर्चायां राष्ट्रहितं प्रथमम् इति सर्वोपरि निध्याय प्रौढ-विमर्शस्य आवश्यकता - निर्मला सीतारामण




केन्द्रीय-वित्तमन्त्री निर्मला सीतारमण दृढतया प्रतिपादितवती यत् सर्वकाराय समर्प्यमाणेषु कर-सम्बन्धि-प्रस्तावेषु मानाङ्क-न्यूनीकरणस्य, कर-मुक्तेः, सौविध्य-प्रदानस्य च याचनायाः अपेक्षया राष्ट्रं प्रथमम् इति भावः सर्वोपरि स्थापनीयः। सा बेङ्गलूरुनगरे अन्ताराष्ट्रिय-कर-अनुसन्धान-विश्लेषण-प्रतिष्ठानेन आयोजिते नवयुग-कराधानविषये द्विदिवसीय-सम्मेलनस्य उद्घाटनसत्रे सम्बोधयन्ती आसीत्। मन्त्री शिक्षाविदः, शोधकर्तॄन्, चिन्तकान् च आहूय स्वतन्त्र-कर-नीति-संशोधनम् सार्वजनिक-संवादस्य नियमितं भागं कर्तुं आदिष्टवती, यस्य परीक्षणं, समाह्वानम्, परिष्कारः च कर्तुं शक्यते ।

# अन्ताराष्ट्रिय-जल-क्षेत्रे पाकिस्तानीय-नौसेना-घटकानाम् अस्वीकार्य-व्यवहारं विरुध्य भारतेन तीव्रापत्तिः प्रदर्शिता




विदेश-मन्त्रालयेन नवदेहल्यां पाकिस्तान-उच्चायोगस्य कार्यवाहक-प्रमुखः आहूतः, अथ च समुद्रे पाकिस्तानीय-नौसेना-घटकस्य अस्वीकार्य-व्यवहारं विरुध्य तीव्रापत्तिः प्रकटिता। मन्त्रालयेन एकस्मिन् वक्तव्ये स्पष्टीकृतं यत् यद्यपि अन्ताराष्ट्रिय-जल-क्षेत्रे घटितायाम् अस्यां घटनायां कापि महती क्षतिः न जाता, तथापि एषः व्यवहारः एकनवत्यधिक-एकोनविंशतितमस्य वर्षस्य अप्रैल-मासे भारत-पाकिस्तानयोः मध्ये सैन्य अभ्यासानां, युद्धाभ्यास-सञ्चालनस्य, सैन्य सञ्चारस्य च पूर्व-सूचना-विषये सम्पन्नस्य सन्धेः सर्वथा प्रत्यक्ष-उल्लङ्घनम् अस्ति। विदेश-मन्त्रालयेन पाकिस्तानस्य प्रभारी राजनयिकः निर्देशितः यत् सः सम्बद्ध-पाकिस्तानीय-अधिकारिभ्यः इदं सन्देशं प्रेषयेत् यत् भविष्ये एतादृशीनां दुर्घटनानां निवारणार्थं सर्वे सैन्य-घटकाः आवश्यकावधानं वर्तयेयुः अथ च उभयोः पक्षयोः मध्ये सम्पन्न-द्विपक्षीय-सन्धेः प्रावधानानां पूर्ण-सम्मानं कुर्युः।

## नीति-आयोगेन भारत-विद्युत्-सञ्चार-सूचकाङ्कः प्रख्यापितः



पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य आई. ई. एम्. आई. इति इण्डिया-एलेक्ट्रिक्-मोबिलिटी-इण्डेक्स् इत्यस्य अनुसारं विद्युत्-मोबिलिटी-स्वीकरणस्य विषये राज्येषु केन्द्रशासितप्रदेशेषु च दिल्ली-नगरं शीर्षस्थाने अस्ति। नवदेहल्यां नीति-आयोगेन सूचकाङ्कः लोकार्पितः, यस्मिन् उपराष्ट्रियस्तरे ई-मोबिलिटी इत्यस्य कृते नीति-संरचना अथ कार्यान्वयन-परिणामयोः रूपरेखा अस्ति। देहल्याः अनन्तरं, अन्यानि शीर्षप्रदर्शक-राज्यानि केन्द्रशासितप्रदेशाः च महाराष्ट्र-कर्नाटक-चण्डीगढ-गोवा राज्यानि च सन्ति। एतत् सूचकाङ्कस्य द्वितीयं संस्करणम् अस्ति सहैव एतत् राज्यानां केन्द्र-शासित प्रदेशानां च विद्युत् सञ्चार-लक्ष्यानि साधयितुं प्रगतिं मापयति। सूचकाङ्कस्य विमोचनं कुर्वन् नीति आयोगस्य सदस्यः राजीव गौबा वर्यः अवदत् यत् सप्तचत्वारिंशदधिक द्विसहस्रतमवर्षपर्यन्तं विकसित-भारतस्य महत्त्वाकांक्षायै विद्युत्-सञ्चारस्य परिवर्तनम् आर्थिकं, पर्यावरणात्मकं, सामरिकं च अनिवार्यं वर्तते।

# सेमिकान् इण्डिया इत्यस्य पञ्चमं संस्करणम् उद्घाटितवान् प्रधानमन्त्री



प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् भारतस्य प्रौद्योगिकीय-भविष्यस्य रूपरेखा-निर्माणे सर्वकारस्य सेमीकण्डक्टर-उद्योगस्य च मध्ये घनिष्ठः सहयोगः अतिआवश्यकः अस्ति। नवदिल्लीयां सेमीकण्डक्टर-गोलमेज-सम्मेलनस्य अध्यक्षताम् कुर्वन् श्रीमोदी प्रतिभायाः, प्रयुक्तेः (प्रौद्योगिक्याः), अधोसंरचनायाः च विषये भारतस्य सबलस्य आधारस्य उल्लेखम् अकृत। तेन कौशलविकासस्य, नवाचारस्य, कृत्रिमप्रज्ञायाः (AI) तथा क्वान्टम्-कम्प्यूटिंग् इत्याद्यानाम् उदीयमानानां प्रौद्योगिक्यानाम् विषये उद्योगस्य अधिकसहभागितायाः आह्वानं कृतम्। कृत्रिमप्रज्ञायां (AI) कोटिपरिमितान् (एककोटिम्) जनान् प्रशिक्षयितुः लक्ष्यस्य उल्लेखं कुर्वन् प्रधानमन्त्री अवदत् यत् भारतीयप्रतिभा, वैश्विक-उद्योग-जगत् अनुभवः क्षमता च मिलित्वा महत्त्वपूर्णान् अवसरात् सृष्टुम् शक्नुवन्ति।
सेमीकण्डक्टर-क्षेत्रे जातेन महत्त्वपूर्णेन प्रगतेः उल्लेखं कुर्वन् प्रधानमन्त्री अवदत् यत् अयम् इकोसिस्टम् (पारिस्थितिकीय-तन्त्रम्) इदानीं व्यापक-स्तरे अवसराणां च चरणे प्रवृत्तः अस्ति। श्रीमोदी एतदर्थं उत्तरदायित्वपूर्णं नीतिगत-वातावरणं निर्मातुं सर्वकारस्य प्रतिबद्धतां पुनरपि अवदत्। सः अवदत् यत् प्रौद्योगिकीय-प्रगतेः उद्योगस्य आवश्यकतानां च अनुरूपाः नीतयः निर्मातव्याः। सम्मेलने मुख्यकार्यकारीधिकारिणः (CEO) भारतस्य सेमीकण्डक्टर-क्षमतायाः विकासाय सर्वकारस्य निरन्तरप्रयासानां प्रशंसां चक्रुः। ते भारतं वैश्विकस्तरे प्रतिस्पर्धि-सेमीकण्डक्टर-प्रौद्योगिकी-केन्द्ररूपेण अभ्युत्थातुम् योगदानं दातुं स्वप्रतिबद्धतां प्रकटीकृतवन्तः।

# सऊदी-अरब-देशेन हूथी-विद्रोहिणां ड्रोण-विमानं निरुद्धम्, भविष्यत्-आक्रमणानां विरोधे दृढ-पदक्षेपाणां सञ्चेतना





सऊदी-अरब-देशेन विज्ञापितं यत् गतरात्रौ मक्का-नगर-समीपे तदीयेन वायु-प्रतिरक्षा-तन्त्रेण हूथी-विद्रोहिणां प्रेषितम् एकं ड्रोन-विमानम् अन्तराले एव निरुध्य विनष्टीकृतम्। यमन-देशे वैधता-समर्थक-गठबन्धन सैन्यस्य प्रवक्ता, मेजर जनरल् तुर्की अल-मालिकी-महाभागः घटनाम् इमां मक्का-नगरीं लक्ष्यीकृत्य हूथी-विद्रोहिणां द्वितीयः आक्रमण प्रयासः इति न्यरूपयत्, यत्र सः सप्तदशाधिक-द्विसहस्रतमे वर्षे क्षिप्तस्य बैलिस्टिक्-प्रक्षेपास्त्रस्य पूर्व-घटनायाः सन्दर्भम् अददात्। तेन सावधानता प्रकटिता यत् सऊदी-नेतृत्वे कार्यरतः गठबन्धनः आगामि-आक्रमणानां निवारणार्थम् आवश्यक कार्याचरणं विधास्यति। अपरत्र, हूथी-विद्रोहिभिः मक्का-नगरं प्रति आक्रमणस्य आरोपाः प्रत्याख्याताः । इयं घटना सऊदी अरब-देशस्य अथ हूथी-विद्रोहिणां मध्ये तीव्रतया वर्धमानस्य सङ्घर्षस्य वातावरणे संवृत्ता। सऊदी अरब-देशस्य नागरिक-सुरक्षा-विभागेन स्वकीय-प्रमुख-रक्त-सागर-तैल-पत्तनं यन्बु इति नगरं विहाय षट्सु अन्य-नगरेषु सञ्चेतना प्रख्याप्य पश्चात् ते प्रत्याहृताः।

# हरियाणाराज्ये, चण्डीगढे, पञ्जाबे, पूर्वोत्तर-भारतस्य च कतिचित्- भागेषु अतिवृष्टेः वर्तते पूर्वानुमानम्



भारतस्य ऋतु-विभागेन अण्डमान-निकोबार-द्वीपेषु, अरुणाचलप्रदेशे, असमराज्ये, मेघालये, हरियाणायां, चण्डीगढ-प्रदेशे, पञ्जाब-प्रदेशे च प्रचण्डवृष्टिः भविष्यति इति पूर्वानुमानं प्रकटितम् अस्ति। केरलम्, माहे, पञ्जाब, उपहिमालयी पश्चिमबङ्गाल, सिक्किम, तमिलनाडु, पुदुचेरी, करैकल् इत्येतेषु प्रदेशेषु अपि दिने तथैव स्थितिः भवितुम् अर्हति। देहल्याम् अल्पवृष्टिः भविष्यति इति ऋतुविभागेन पूर्वानुमानं कृतम् अस्ति। बिहारस्य, जम्मू-कश्मीरस्य, लद्दाखस्य, झारखण्ड्-राज्यस्य, ओडिशा-राज्यस्य, राजस्थान-प्रदेशे च अग्रिमे द्वि वा त्रिषु दिनेषु मेघगर्जनेन विद्युत्-स्खलनस्य च सम्भावना अस्ति इति विभागः अवदत्।

# चिट्टा'-विक्रेतृभ्यः हिमाचले नास्ति किमपि स्थानम्

## ऊनायां चिट्टा-विरोधि-पदयात्रायां अवदत् मुख्यमन्त्री सुक्खू



**हिमसंस्कृतवार्ताः- ऊना।**
मुख्यमन्त्री सुखविन्दरसिंहसुक्खू ऊनायाम् आयोजितायाः 'चिट्टा- विरोधि- जन- जागरूकता- पदयात्रायाः' नेतृत्वम् अकरोत्। अस्मिन् अवसरे सः प्रदेशवासिनः, विशेषतः यूनः, मादक-द्रव्याणां विरुद्धं निर्णायकसङ्ग्रामे सक्रिय-सहभागितां निर्वोढुम् आहूतवान्। इयं पदयात्रा इन्दिरा- क्रीडाङ्गणात् प्रारभ्य नूतन-बस-स्थानकं गत्वा पुनः इन्दिराक्रीडाङ्गणं सम्प्राप्य सम्पन्ना अभवत्। मण्डलस्य छात्राः सामान्य-जनाश्च अत्र सोत्साहं समन्विताः। पदयात्रायाः पूर्वं मुख्यमन्त्रिणा उपस्थितेभ्यः जनेभ्यः 'चिट्टा-विरोधिशपथः' कारिता।
मुख्यमन्त्रिणा प्रतिपादितं यत् राज्यसर्वकारः मादकतायाः विरुद्धं पूर्ण-कठोरतया युध्यते, किन्तु अस्य सङ्ग्रामस्य साफल्यं समाजस्य सर्व-वर्गाणां सहभागेन एव सम्भवति। सः अवदत् यत् ये जनाः बालकेभ्यः चिट्टा-मादक-द्रव्यं विक्रीय धनम् अर्जयन्ति, युवकानां जीवनं नाशयित्वा स्व-गृहाणि पूरयन्ति, तेभ्यः ऊना-धरातलात् स्पष्टः सन्देशः अस्ति यत् हिमाचलप्रदेशे मादक-द्रव्य-व्यापारिणां कृते किमपि स्थानं न विद्यते।

### विक्रेतृणां विरुद्धं कठोर-दण्डः, ग्रस्तानां कृते संवेदना

सर्वकारस्य नीतिं विशदयन् मुख्यमन्त्री न्यवेदयत् यत् चिट्टा-विक्रेतृणां विरुद्धं विधिना सह कठोरतमा कार्यविधिः विधास्यते, किन्तु ये युवानः अस्य जाले बद्धाः सन्ति, तैः सह संवेदनशील-व्यवहारं कृत्वा तेषाम् उद्धाराय सर्वविधा सहायता प्रदास्यते। सः अवदत् यत् विक्रेता जालबद्धश्च व्यक्तिः सम-दृष्ट्या द्रष्टुं न शक्येते। सः छात्रान् आहूतवान् यत् स्वमित्राणि दुष्पथे गन्तुं न प्रेरयेयुः, यतो हि मित्रमेव मित्रस्य व्यवहार-परिवर्तनं प्रथमतया अभिज्ञातुं शक्नोति।
तेन उल्लिखितं यत् आरक्षिविभागः स्व-कार्यं करोति, किन्तु केवलम् आरक्षि-बलेन अयं सङ्ग्रामः जेतुं न शक्यते। आरक्षकाः तस्करं ग्रहीतुं शक्नुवन्ति, सर्वकारश्च विधानं रचयितुं शक्नोति, किन्तु बालकान् प्रथम-प्रहासात् रक्षितुं परिवारः, मित्राणि, शिक्षकाः, समाजश्चैव समर्थाः भवन्ति। अत एव इदम् अभियानं जनान्दोलन-रूपेण परिवर्तितम्।

### ११२ सङ्ख्यायां सूचना-दानाय पुरस्कारव्यवस्था

मुख्यमन्त्रिणा पञ्चायतेभ्यः, महिला-मण्डलेभ्यः, युवा-मण्डलेभ्यः, शिक्षकेभ्यश्च आरक्षिभिः सह स्थातुम् आवाहनं कृतम्। तेन युवानः अस्य आन्दोलनस्य सैनिकाः भवितुं प्रेरिताः। यत्र कुत्रापि चिट्टा-विक्रयणं दृश्येत, तत्र मौनं त्यक्त्वा निःशुल्क-सङ्ख्यायां '११२' इत्यस्यां विश्वसनीया सूचना समर्पणीया। सर्वकारेण प्रामाणिक- सूचना-दातृभ्यः पुरस्कार-व्यवस्था अपि कृता अस्ति।
सः संस्मृतवान् यत् १५ नवम्बर २०२५ दिनाङ्के शिमलातः प्रारब्धम् इदम् आन्दोलनं धर्मशाला-हमीरपुर- बिलासपुरनगरेषु जन-शक्त्या सह अग्रे प्रवृत्तम्, अद्य च नव-मासानन्तरम् ऊना-नगरे जनैः दृढ-सङ्कल्पः प्रकटितः।

### अवकाश-उद्घोषणं विकास-कार्याणां च लोकार्पणम्

३५ तः ४० परिमिते तीव्रे तापेऽपि छात्राणाम् उत्साहं श्लाघमानः मुख्यमन्त्री १७ सितम्बर-दिनाङ्के ऊनामण्डलस्य समेषां सर्वकारीय- निजी-विद्यालयानां कृते अवकाशम् उदघोषयत्। अनेन सहैव मुख्यमन्त्रिणा ३.८७ कोटि-रूप्यकाणां व्ययेन निर्मितस्य बहुतलीय- खण्ड- विकास- कार्यालय-भवनस्य लोकार्पणं, सन्तोषगढ-मार्गे ९.५५ कोटिरूप्यकैः निर्मीयमाणस्य रामपुरसेतोः आधारशिला स्थापिता।

# आईपीएस-अधिकारिणे संजीवगान्धिने उच्चन्यायालयात् समाश्वासनम्; याचिकायाः निस्तारणम्

**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेश-उच्चन्यायालयेन भारतीय- आरक्षि- सेवा- अधिकारिणे संजीवकुमारगान्धिने महत् समाश्वासनं प्रयच्छता तस्य याचिकायाः निस्तारणं कृतम्। मुख्यन्यायाधीशस्य गुरमीतसिंहसन्धावालिया-महोदयस्य न्यायाधीशास्य जियालालभारद्वाजस्य च खण्डपीठेन प्रतिपादितं यत् अधिकारिणः पदोन्नतिप्राप्तेः अनन्तरम् इदं प्रकरणम् अधुना निष्फलं जातम्।
खण्डपीठेन स्पष्टीकृतं यत् याचिकाकर्त्रे २३ जनवरी २०२६ दिनाङ्के आरक्षि-अधीक्षक-पदात् पदोन्नतिं दत्त्वा आरक्षि-उपमहानिरीक्षक-पदे नियुक्तः कृतः। उच्चन्यायालयेन दृष्टं यत् एकल-पीठस्य पूर्वनिर्णये कृतानां प्रतिकूलटिप्पणीनाम् अधिकारिणः सेवावृत्तौ कोऽपि कुप्रभावः न पतितः।



### पदोन्नतौ सत्यां विवादित-टिप्पण्यः निष्प्रभावाः- उच्चन्यायालयः

उच्चन्यायालयेन उल्लिखितं यत् ५ जून २०२५ दिनाङ्के अस्यां याचिकायां सूचनापत्रं केवलम् एतदर्थं निर्गतम् आसीत् यत् किं प्रकरणस्य अन्वेषणं 'सीबीआई' संस्थायै समर्पणकाले एकलपीठेन कृताभिः टिप्पणीभिः अधिकारिणः सेवा-कॅरियर-विषये कोऽपि दुष्प्रभावः भविष्यति वा न। न्यायलयेन स्व-आदेशे प्रतिपादितं यत् यदा राज्यसर्वकारेण अधिकारी पदोन्नत्या विभूषितः, तदा इदं स्पष्टं भवति यत् सर्वकारेण ताः विवादास्पद-टिप्पण्यः अधिकारिणः विरुद्धं न गणिताः। फलतः इयं याचिका साम्प्रतं प्रासङ्गिकी न वर्तते।
विदितं स्यात् यत् इदं सम्पूर्णं प्रकरणं दिवंगतस्य मुख्य-अभियन्तुः विमल-नेगी-महोदयस्य मृत्युप्रकरणस्य अन्वेषणं यदा एकल-पीठेन 'सीबीआई' संस्थायै समर्पितम् आसीत्, तदा तदर्थं निर्मितायाः 'विशिष्ट-अन्वेषण-समित्याः' प्रमुखस्य संजीवकुमारगान्धिनः न्यायालय-पक्षतः कृताभिः टिप्पणीभिः सह सम्बद्धम् आसीत्।

# पाटलिपुत्रे समेष्यन्ति समग्रदेशस्य स्वास्थ्यविशेषज्ञाः रुग्णसुरक्षां समधिकृत्य भविष्यति गम्भीरमन्थनम्




## सप्तदश-अष्टादश-सितम्बरयोः द्वैदिवसीयः राष्ट्रियरुग्णसुरक्षा-समारोहः; उपमुख्यमन्त्री विजयकुमारचौधरी-महोदयः करिष्यत्युद्घाटनम्

हिमसंस्कृतवार्ताः- राघवनाथ झा, पाटलिपुत्रम्
रुग्णानां संरक्षणं, स्वास्थ्योपचर्यायाः गुणवत्तां, चिकित्सालयेषु च रुग्णानां दृढ-विश्वासस्थापनं समुद्दिश्य पाटलिपुत्रनगरे आगामिनि सितम्बरमासस्य सप्तदशे अष्टादशे च दिनाङ्के द्वैदिवसीयस्य 'राष्टरियरुग्णसुरक्षा-कार्यक्रमस्य' भव्यमायोजनं भविष्यति। अयम् उपक्रमः रूबन-स्मृति- चिकित्सालयस्य तत्त्वावधाने 'सी ए एच ओ' (CAHO), 'एएचपीआई' (AHPI), 'सीआईआई बिहार' (CII Bihar) इत्येतेषां सङ्घानां संयुक्ताश्रयेण निर्वह्यते। अस्य समारम्भस्य समुद्घाटनं बिहारराज्यस्य उपमुख्यमन्त्री विजयकुमारचौधरी-महोदयः विधास्यति।
अस्मिन् सङ्गोष्ठी-महोत्सवे समग्रदेशात् सुविख्याताः चिकित्सकाः, चिकित्सालय- प्रबन्धनविचक्षणाः, स्वास्थ्यसेवा- मुख्यकार्यकारि- अधिकारिणः (CEOs), रुग्णसुरक्षा- गुणवत्ताविज्ञाः, नीति निर्धारकाश्च समवेताः भविष्यन्ति। अस्मिन् अवसरे सुरक्षित-रुग्णकेन्द्रित-स्वास्थ्यसेवाः अभिलक्ष्य विस्तृतं विचार-विमर्शनं सम्पात्स्यते।
कार्यक्रमेऽस्मिन् औषधसुरक्षा, निदानसुरक्षा, शल्यक्रियासुरक्षा, मानवीय-कारकाणि, रुग्ण-परिवार- सक्रिय- सहभागिता इत्यादयो विषयाः समन्वेषिष्यन्ते। तदतिरिच्य दत्तांश-विश्लेषणेन, अङ्कीय-तन्त्रज्ञानेन, कृत्रिम-प्रज्ञया, स्वास्थ्यसेवानां सुरक्षणप्रक्रियासु परिवर्तनम् इति विषयेषु गम्भीरम् आलोचनं भविष्यति।रूबन-चिकित्सालय-समूहस्य प्रबन्धनिदेशकः डा. सत्यजीतकुमारसिंह-महोदयः प्रत्यपादयत् यद् रुग्णसुरक्षा न केवलम् उपचारेणैव परिमिता, अपि तु समग्रोपचर्या-यात्रायाः निर्भयता अत्यावश्यकी वर्तते। एतदर्थं सुदृढ-व्यवस्थापनं, सामूहिकसहयोगः, स्पष्टसंवादः, औषधानां निर्दोषः प्रयोगः, सङ्क्रमणनियन्त्रणं, प्रमाद-घटनावभ्यः शिक्षणसंस्कृतेः विकासः सर्वथा समीचीनः। तेन स्पष्टमुक्तं यद् रुग्णसुरक्षायां चिरस्थायिपरिवर्तनाय चिकित्सकानां, चिकित्सालय- प्रबन्धकानां, विशेषज्ञानां, नीतिनिर्मातॄणां च सम्मिलितः साकल्येन प्रयासः परमावश्यकः अस्ति।



हिमसंस्कृतवार्ताः, ईदरधीरजः

# वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अद्यतनी प्रथमा वार्ता विज्ञान-विषयिणी। वैज्ञानिकैः 'ऐन्स्टैन-शिरस्त्रस्य' आकारेण एका नूतना रचना कृता। लेसर-प्रकाशः तत्र क्षिप्तः। तेन प्रकाशः विचित्ररूपेण वक्रितः।
काव्या- नमस्ते नन्दिनि। अहो, सा रचना अतीव विचित्रा! इदानीं द्वितीयां वार्तां शृणु। गुरुग्रामे एकेन नरेण स्वकार्यं त्यक्तम्। परन्तु भयेन इदं सत्यं परिवाराय न कथितम्। प्रतिदिनं तेन कार्यालय-वस्त्राणि धृतानि, उद्याने च स्थितम्।
नन्दिनी- तस्य नरस्य स्थितिः खलु दुःखदायिनी। तृतीया वार्ता अमेरिका-देशात् प्राप्ता। तत्र एकः वृद्धः नेता बहु-दिनानन्तरं पर्णेण सभायाम् आगतः। तदा जनैः चिन्तितं यत् सः मूल-व्यक्तिः न, अपि तु तस्य कृत्रिम-प्रतिरूपं निर्मितम् इति।
काव्या- जनानां विचारः हास्यास्पदः। अन्तिमा वार्ता क्रीडाक्षेत्रात्। चीनदेशे एका धावनस्पर्धा आयोजिता। तत्र एकया क्रीडिकया उदर-पीडया स्ववस्त्राणि मलिनानि कृतानि। तथापि तया स्पर्धा न त्यक्ता, अपि तु सा स्पर्धा जिता। तेन कारणेन आयोजकैः नूतनाः नियमाः रचिताः।
नन्दिनी- अहो! सा घटना अतीव प्रेरणादायिका! अद्यतन्याः वार्तायाः समाप्तिः। धन्यवादः।

# समाननागरिकसंहितायाः (UCC) विषये माञ्झिमहोदयस्य समर्थनम्; राजग- गठबन्धनान्तर्गतं पृथक्-पृथक् मतानि



- केन्द्रीयमन्त्री अवदत्- 'संविधानस्य समानतासिद्धान्तानुसारेण भवेद् अस्य प्रवर्तनम्'।
- जनता-दल-यूनाईटेड-दलस्योद्घोषः- 'पूर्वम् आलेखस्य अध्ययनं करिष्यामः'

हिमसंस्कृतवार्ताः राघव नाथ झा, पाटलिपुत्रम्
समाननागरिकसंहितां (UCC) समधिकृत्य बिहारराज्ये राजनैतिकचर्चा-विमर्शः अत्यन्तं तीव्रः सञ्जातः। केन्द्रसर्वकारस्य मन्त्री, 'हिन्दुस्तानी अवाम मोर्चा' इत्यस्य संरक्षकः जीतनराममाञ्झिमहोदयः समाननागरिकसंहितायाः समनुमोदने स्वकीयं मतं स्पष्टमकरोत्। सः एतत् विषये संविधानप्रदत्त-समानताधिकारं समुल्लिख्य अकथयत् यत् अस्य अनुपालनविषये राजनैतिक-कूटनीतिप्रपञ्चानां प्रस्थापनं सर्वथा अनुचितम् अस्ति।
माञ्झिमहोदयेनोक्तं यद् बाबासाहेब- भीमराव-अम्बेडकर- विरचितं संविधानं देशस्य पन्थनिरपेक्षव्यवस्थां सर्वेभ्यः नागरिकेभ्यः समानताधिकारं च प्रददाति। सः समाननागरिकसंहितया सहैव त्रि-तलाक्-प्रथायाः निष्कासनं त्रिंशदधिक- त्रिशततम- (३७०)-अनुच्छेद- सम्बन्धिनिर्णयान् अपि दृढतया समर्थितवान्। तस्य मतानुसारं सर्वकारः संवैधानिकानां व्यवस्थानां समुचित-प्रवर्तने एव कटिबद्धः दृश्यते।

## जदयू-दलस्य भिन्नः दृष्टिकोणः

समाननागरिकसंहितां प्रति राष्ट्रीय- जनतान्त्रिक-गठबन्धनस्य (राजग/NDA) घटकदलेषु परस्परविरोधिस्वरः परिलक्ष्यते। केन्द्रीयगृहमन्त्रिणा अमितशाहमहोदयेन २०२९ तमवर्षस्य लोकसभानिर्वाचनात् प्रागेव राजग-शासितराज्येषु समाननागरिकसंहितायाः प्रवर्तनस्य सङ्कल्पः उद्घोषितः। अनन्तरं जनता-दल-यूनाईटेड-पक्षेण बिहारराज्ये तत्क्षणमेव अस्य प्रयोगस्य विषये भिन्नः मार्गः आश्रितः। दलेन प्रतिपादितं यत् प्राक् प्रस्तावितसंहितायाः नियमानाम् अनुच्छेदानां च सूक्ष्ममध्ययनं विधास्यते, तदनन्तरमेव अग्रीमा राजनैतिकी स्थितिः निश्चेष्यते।
एतदन्तरे, माञ्झिवर्यस्य स्पष्टसमर्थनेन बिहारराज्ये समाननागरिकसंहितां समधिकृत्य राजग-गठबन्धनस्य घटकदलेषु वैचारिकं मतवैविध्यं स्पष्टतया सम्मुखम् आगतम् अस्ति।

# नालन्दाजनपदे महाबोधिमहाविद्यालये नवनिर्मितस्य स्व. शिवनन्दनप्रसाद-केसरी-शैक्षणिकभवनस्य उद्घाटनम्



**हिमसंस्कृतवार्ताः- डॉ. विमलेश झा, नालन्दा/ भागलपुरम्।** विहारराज्यस्य नालन्दाजनपदस्य सिलावप्रखण्डे स्थिते महाबोधिमहाविद्यालये नवनिर्मितस्य स्वर्गीय- शिवनन्दनप्रसाद- केसरी- शैक्षणिक- भवनस्य उद्घाटनं सम्पन्नम्। जनता दल यूनाइटेडदलस्य राष्ट्रियाध्यक्षः, बिहारस्य पूर्वमुख्यमन्त्री, राज्यसभायाः सदस्यश्च नीतीशकुमारः मुख्यातिथिरूपेण भवनस्य सूत्रच्छेदनं कृत्वा दीपप्रज्वालनं च विधाय भवनस्य विधिवत् लोकार्पणं कृतवान्। महाविद्यालय-विकासनिधिना निर्मितं नूतनं भवनं आधुनिकशैक्षणिकसुविधाभिः सुसज्जितम् अस्ति। अस्य भवनस्य निर्माणेन महाविद्यालये छात्राणां शिक्षकाणां च कृते पठनपाठनाय अतिरिक्तं आधुनिकं च स्थानम् उपलब्धं जातम्। समारोहं सम्बोधयन् मन्त्री श्रीश्रवणकुमारः अवदत् यत् स्वर्गीय- शिवनन्दनप्रसादकेसरीमहोदयस्य नाम्ना निर्मितं नूतनं शैक्षणिकभवनं आधुनिकसुविधाभिः युक्तम् अस्ति। अनेन भवनेन महाविद्यालयस्य छात्रछात्राभ्यः, प्राचार्याय पठन- पाठनाय च उत्तमं शैक्षणिकवातावरणं प्राप्स्यते।

ते अवदन् यत् नीतीशकुमारवर्येण स्वहस्ताभ्यां भवनस्य उद्घाटनं कृत्वा नालन्दायाः शिक्षाक्षेत्रे उत्साहः वर्धितः। अस्य कृते महाविद्यालयपरिवारः क्षेत्रस्य जनसमुदायश्च तं प्रति कृतज्ञतां प्रकटयति।

श्रवणकुमारवर्यः अवदत् यत् महाबोधिमहाविद्यालयः पाटलिपुत्रविश्वविद्यालयस्य अन्तर्गतं प्रथमं मान्यताप्राप्तं संस्थानम् अस्ति, यत्र एकीकृतबी.एडपाठ्यक्रमस्य अध्ययनस्य व्यवस्था अस्ति। अस्य पाठ्यक्रमस्य अन्तर्गतं छात्राः अन्तरस्नातकस्तरे प्रवेशं स्वीकृत्य चतुर्वर्षीयम् एकीकृतपाठ्यक्रमं पूर्णं कृत्वा बी.एडपदवीं प्राप्तुं शक्नुवन्ति।

मन्त्रिणा उक्तं यत् महाविद्यालये छात्राणां नामाङ्कनं दृष्ट्वा पठनपाठनाय पर्याप्ताः सुव्यवस्थिताः च व्यवस्थाः कृताः सन्ति। महाविद्यालयस्य शिक्षकाः छात्रेभ्यः उत्तमशिक्षाप्रदानाय निरन्तरं प्रयतन्ते। नूतनशैक्षणिकभवनस्य निर्माणेन महाविद्यालये पठन-पाठनाय अतिरिक्तं आधुनिकं च स्थानं प्राप्तम् अस्ति। महाविद्यालय-प्रबन्धनस्य अनुसारं भवनस्य मुख्योद्देशं छात्रेभ्यः उत्तमं शैक्षणिकवातावरणं प्रदानम् अस्ति।

एकीकृत- बी.एडपाठ्यक्रमस्य कारणात् शिक्षकप्रशिक्षणं प्राप्तुम् इच्छुकानां छात्राणां कृते एकस्मिन्नेव संस्थाने स्नातकस्तरीयशिक्षया सह शिक्षकप्रशिक्षणस्य अवसरः प्राप्यते। नूतनभवनस्य माध्यमेन ग्रामीणक्षेत्रस्य छात्राणां कृते अपि आधुनिकशैक्षणिकसुविधाः सुलभाः भविष्यन्ति।उद्घाटनसमारोहे उपस्थितैः जनप्रतिनिधिभिः विश्वविद्यालयीयाधिकारिभिः महाविद्यालय-प्रशासनस्य सदस्यैश्च नूतनभवनस्य निर्माणं शिक्षाक्षेत्रस्य विकासाय महत्त्वपूर्णं पदक्षेपम् इति प्रतिपादितम्। उद्घाटनसमारोहे नालन्दायाः सांसदः कौशलेन्द्रकुमारः, बिहारविधानपरिषदः सत्तारूढदलस्य उपनेता ललनसर्राफः, मुख्यसचेतकः संजयकुमारसिंहः उर्फ 'गाँधीजी', सचेतिका रीनादेवी, पाटलिपुत्र-विश्वविद्यालयस्य कुलपतिः प्रो. उपेन्द्रप्रसादसिंहः, महाविद्यालय- शासीनिकायस्य सचिवः राजेन्द्रप्रसादः, प्राचार्यः डॉ. अरविन्दकुमारः इत्यादयः अनेके गणमान्याः जनाः च उपस्थिताः आसन्।

# आपद्-विपत्तौ जनसेवासङ्कल्पः- सम्राट्- शिवराज-महोदयाभ्यां कृतं जलप्लव- विभीषिकायाः प्रत्यक्ष-समीक्षणम्



**मनेर-दिघवारा-तः राघोपुरपर्यन्तं व्योममार्गेण भूमार्गेण च निरीक्षणम्; नौकया कर्षियन्त्रेण (ट्रैक्टर) चापद्ग्रस्त-क्षेत्रेषु गमनम्; कृषकैः शस्यक्षतिपूर्तेः मार्ग-समस्यायाश्च याचितं समाधानम्**

हिमसंस्कृतवार्ताः- राघवनाथ झा, पाटलिपुत्रम्

बिहारराज्ये आपतितेन दारुणेन जलप्लवेन (बाढ) सञ्जातायाः विभीषिकायाः, अपार- धनधान्यक्षतेश्च यथार्थज्ञानार्थं मुख्यमन्त्री सम्राट् चौधरी, केन्द्रीय- कृषि तथा कृषक-कल्याण-ग्रामीण- विकासमन्त्री शिवराजसिंचौहानश्च बुधवासरे सङ्कटग्रस्त-परिक्षेत्रेषु पर्यटितवन्तौ। द्वाभ्यामेव पाटलीपुत्रस्य मनेर-प्रखण्डात् सारणमण्डलस्य दिघवारापर्यन्तं जलप्लावितानां भूभागानां विहङ्गम-दृष्ट्या (व्योमयानेन) सर्वेक्षणं विहितम्। तदनन्तरं वैशाली-मण्डलान्तर्गतस्य राघोपुरप्रखण्डस्य तेरसिया-सरायपुर-ग्रामयोः उपस्थाय द्वाभ्यामपि भूस्तरीयस्थितेः समवलोकनं शस्यविनाशस्य सूक्ष्ममूल्याङ्कनं कृतम्।

**नौकया जलमग्नग्रामेषु प्रवेशः, कर्षियन्त्रेण च शस्यक्षेत्राणाम् अन्वीक्षणम्**

राघोपुर-क्षेत्रे मुख्यमन्त्री केन्द्रीयमन्त्री च प्राक् नौकाम् आरुह्य जलप्लावितानां प्रान्तानां स्थितिम् आलोकितवन्तौ। ततः परं कर्षियन्त्रे (ट्रैक्टरयाने) अधिष्ठाय तोयावृतानां ग्रामाणां शस्यक्षेत्राणां च अन्तः प्रविष्टवन्तौ। ताभ्यां जलनिमग्नानां क्षेत्राणां, विनिष्टसस्यानां, जलव्याप्तानां मानवनिवासानां च दशा दृष्टा; ग्रामवास्तव्यैः कृषकैश्च सह साक्षात् संवद्य तेषां दारुणव्यथाः ज्ञाताः।

ग्रामवासिभिः मार्गस्य उच्चतावर्धनं, नूतन- मार्ग-निर्माणं, जलौघ-विनाशितानां शस्यानां कृते समुचितायाः आर्थिकक्षतिपूर्तेश्च दृढा याचना कृता। जनैः स्वसमस्या-सम्बद्धानि आवेदनपत्राणि अपि समर्पितानि। उभौ नेतारावपि जनानां निवेदनानि श्रुत्वा सम्बन्धित-प्रशासकाधिकारिणः त्वरित-कार्याचरणार्थम् आदिष्टवन्तौ।

**शिवराज-वर्यस्योद्घोषः- २०१६-तमाब्दापेक्षया पाद- परिमितम् अधिकं जलम्**

केन्द्रीयमन्त्री शिवराजसिंह चौहानः न्यवेदयत् यद् अस्मिन् मण्डले अस्मिन् संवत्सरे महती जलविभीषिका संवृत्ता। तन्मतानुसारेण २०१६ तमवर्षस्य आप्लवापेक्षया अस्मिन् समये प्रायः पाद-परिमितम् अधिकं जलं प्रवाहितमस्ति। सः क्षेत्रेषु रम्भायाः (कदल्याः), मर्कटकस्य (मक्का) शस्यानां विप्लवं च प्रत्यक्षम् अपश्यत्।

तेनोक्तं यद् अनेन जलप्रवाहेन सस्यैः सहैव गृहाणि पशवश्चापि महतीं क्षतिं प्राप्ताः। राज्यसर्वकारः आपद्ग्रस्त-परिवारेभ्यः सद्यः साहाय्यं वितरति। केन्द्रसर्वकारस्यापि पक्षतः क्षतेः समग्रं मूल्याङ्कनं विधीयते। सः सप्रश्रयं न्यवेदयत् यद् बिहारराज्यम् एतस्मात् सङ्कटात् बहिः निष्कासयितुं केन्द्रसर्वकारः राज्यसर्वकारेण सह दृढतया तिष्ठति, सम्भाव्यं सर्वमपि साहाय्यं प्रदास्यते च।




## लनामिवि-दरभङ्गा-रासेयो-(NSS)-प्रकोष्ठेन द्विशतं स्वयंसेवकानां सप्तदिवसीयस्य 'युवा-आपद्-मित्र' प्रशिक्षण-शिविरस्य कृतम् उद्घाटनम्

### ❑ बिहार-राज्य-आपद्-प्रबन्धन-प्राधिकरणस्य (BSDMA) सौजन्येन प्रवर्तिते शिविरे दरभङ्गा-मधुबनी-समस्तीपुर-मण्डलानां स्वयंसेवकानां सहभागिता

**दरभङ्गा। हिमसंस्कृतवार्ताः राघव नाथ झा।** ललितनारायणमिथिलाविश्वविद्यालयस्य राष्ट्रियसेवाप्रकल्प-(NSS)-प्रकोष्ठस्य तत्त्वावधाने, बिहार-राज्य-आपद्-प्रबन्धन-प्राधिकरणस्य (पाटलीपुत्रम्) सौजन्येन च विश्वविद्यालयपरिसरस्थे 'जुबिली-सभागारे' सप्तदिवसीयस्य "युवा-आपद्-मित्र-आवासीय-प्रशिक्षण-शिविरस्य" विधिवत् उद्घाटनं सम्पन्नम्। अस्मिन् शिविरे दरभङ्गा-, मधुबनी-, समस्तीपुर-मण्डलानां विविध-महाविद्यालयेभ्यः द्विशतं (२००) रासेयो-स्वयंसेवकाः प्रतिभागित्वं कुर्वन्ति।

उद्घाटन-सत्रे वाणिज्य-सङ्कायाध्यक्षाः प्रो. हरेकृष्णसिंह-महोदयाः अध्यक्षपदम् अलङ्कृतवन्तः। स्नातकोत्तर-क्रीडा-विभागाध्यक्षा डा. प्रियङ्कारायः विशिष्टातिथिरूपेण, 'एसडीआरएफ' (SDRF)-दलस्य प्रशिक्षकः रूपेशकुमारपासवानः मुख्यवक्तृत्वेन, शिविर-संयोजकः डा. आर. एन. चौरसिया स्वागतकर्तृत्वेन विषय-प्रवेशकरूपेण च समुपस्थिताः आसन्। कार्यक्रमस्य सञ्चालनं डा. रीताकुमार्या, धन्यवादाभिव्यक्तिश्च डा. अनुपमप्रियया विहिता। मङ्गल-समारम्भः दीप-प्रज्वालनेन राष्ट्रगीतेन च, समापनञ्च राष्ट्रगानेन समभवत्।

अध्यक्षीय-भाषणे प्रो. एच. के. सिंहेन शिबिरस्य भूरि-प्रशंसां कुर्वता प्रोक्तं यत् चतुर्षु विभागेषु (बैच) आहत्य अष्टशतम् (८००) आपद्-मित्राणां प्रशिक्षिते सति समग्रो मिथिलाञ्चल-प्रदेशः आपदाभ्यः सुरक्षितो भविष्यति। विशिष्टातिथ्या डा. प्रियङ्काराय-महोदयया कथितं यद् एतेन प्रशिक्षितेन युवानः 'वसुधैव कुटुम्बकम्' इति भावनया प्रेरिताः सन्तः प्राथमिकोपचारे, त्राण-रक्षण-कार्याचरणे च समाजस्य महतीं सेवां विधास्यन्ति। मुख्यप्रशिक्षकेन रूपेशपासवानेन स्वयंसेवकाः अनुशासिताः भूत्वा गभीरतया शिक्षणं ग्रहीतुं समाहूताः। संयोजकेन डा. आर. एन. चौरसिया-महोदयेन प्रतिपादितं यत् प्राकृतिक-मानव-जनितानाम् आपदानां प्रतिकाराय समाजोन्मुखं वृत्तिप्रदञ्चेदं प्रशिक्षणम् आजीवनम् उपकारकं भविष्यति, येन समाजे विपत्-पूर्व-सज्जतायाः संस्कृतेः विकासः सम्पत्स्यते। अस्मिन् प्रसङ्गे विश्वविद्यालयस्य आचार्याः, अधिकारिणः, 'एसडीआरएफ'-दलस्य सदस्याः, द्विशतं स्वयंसेवकाश्च उपस्थिताः आसन्।

## आभासीय हिन्दी-कविसम्मेलने रचनाकारैः समयः बद्धः

**हिमसंस्कृतवार्ताः सत्येन्द्र पाठकः, लखनऊ।लखनऊ।** संस्कृतसंस्कृति-विकाससंस्थानस्य उत्तरप्रदेशप्रान्तस्य च तत्वावधाने हिन्दीमासोत्सवस्य अन्तर्गतं बुधवासरे आभासीयस्य हिन्दी-कविसम्मेलनस्य आयोजनं कृतम्। सायं 7:30 वादने आयोजिते कार्यक्रमे विद्वांसः, साहित्यकाराः तथा युवा-कवयः सहभागितां कृत्वा हिन्दीभाषायाः साहित्यस्य च प्रति स्वकीयां प्रतिबद्धतां प्रकटितवन्तः। कार्यक्रमस्य शुभारम्भः सुश्रियाः शिवा मिश्रा इत्यस्याः लौकिकमङ्गलाचरणेन अभवत्। ततः आचार्यः देवेश विद्यार्थी स्वागतभाषणं प्रस्तुतवान्। तेन हिन्दीमासोत्सवस्य प्रासङ्गिकतां प्रतिपाद्य भारतीयभाषिक-सांस्कृतिकपरम्परायाः संरक्षणे हिन्दीभाषायाः भूमिकां रेखाङ्कितम्। मुख्यातिथिः प्रो. शिशिरकुमारपाण्डेयः, जगद्गुरुरामभद्राचार्यदिव्याङ्गराज्यविश्वविद्यालयस्य, चित्रकूटस्य, कुलपतिः, हिन्दीभाषायाः साहित्यस्य च समृद्धपरम्परायाः विषये प्रकाशं नीतवान्। तेन साहित्यं मानवीयसंवेदनानां, सांस्कृतिकमूल्यानां सामाजिकचेतनायाश्च अभिव्यक्तेः प्रभावशाली माध्यमम् इति प्रतिपादितम्।विशिष्टातिथिः प्रो. कान्ता भाटिया, गुरुकुलप्रकल्पस्य तथा संस्कृतसंस्कृतिविकाससंस्थानस्य राष्ट्रियाध्यक्षा, हिन्दीभाषायाः निरन्तरसंवर्धनस्य साहित्यिक-गतिविधीनां च विस्तारस्य आवश्यकतां प्रति स्वविचारान् प्रकटितवती। तया युवापीढीं भाषया साहित्येन च सह योजयितुं बलं दत्तम्।काव्यपाठसत्रे सुश्री महक गुप्ता, श्री मयङ्क तिवारी, श्री कौन्तेय जयः तथा श्री अनमोल मिश्रा इत्येतेषां रचनानां प्रभावपूर्णः पाठः अभवत्। विविधविषयैः भावभूमिभिश्च सम्बद्धाः काव्य-प्रस्तुतयः आयोजनं जीवन्तं कृतवन्तः।कार्यक्रमस्य सञ्चालनं सुश्री दृष्टि आर्यया कृतम्। अन्ते श्री सत्येन्द्र पाठकः 'शास्त्री' धन्यवादज्ञापनं प्रस्तुतवान्। आयोजनाध्यक्षा प्रो. अञ्जु सेठ, संयोजकः डॉ. कृष्णकुमारभार्गवः, समन्वयिका डॉ. गीता दुबे तथा आयोजनसचिवः डॉ. सुमन मिश्रा आसन्। प्रतिवेदनलेखनं देवेश विद्यार्थिना कृतम्।

## अन्वेषणाधिकारिणाम् अज्ञानेन न्यायात् वञ्चिताः न भवेयुः पीडिताः; डीजीपी-महोदयाय मार्गदर्शिका -निर्गमनाय उच्चन्यायालयस्य आदेशः

**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेश- उच्चन्यायालयेन आरक्षि-अन्वेषणेषु अवशिष्यमाणानां गम्भीराणां त्रुटीनाम् उपरि कठोरं रुखम् अवलम्ब्य राज्यस्य आरक्षि-महानिदेशकाय सम्पूर्णप्रदेशाय दृढायाः मार्गदर्शिकायाः निर्गमनाय आदेशः प्रदत्तः। न्यायमूर्तेः विवेकसिंहठाकुरस्य न्यायमूर्तेः भूपेशशर्मणश्च खण्डपीठेन स्पष्टीकृतं यत् अन्वेषणाधिकारिणाम् अज्ञानेन, शैथिल्येन प्रमादेन वा कश्चिदपि पीडितः न्यायात् वञ्चितः कर्तुं न शक्यते। उच्चन्यायालयेन सम्पूर्ण- आरक्षि-प्रणाल्यां परिष्काराय कतिपये कठोराः उपायाः स्वीकर्तुं निदेशाः विहिताः।

पीठेन आदिष्टं यत् राज्यस्य सर्वे अन्वेषणाधिकारिणः लेखबद्ध-रूपेण 'किशोर-न्याय- अधिनियम- २०१५' इत्यस्य ९४-तमायाः धारायाः प्रावधानेषु सम्यक् प्रशिक्षिताः सचेषिताश्च क्रियेरन्। अप्राप्तवयस्क-पीडितानां (नाबालिग) विधि- सङ्घर्षग्रस्तानां किशोराणां वा प्रकरणेषु अन्वेषणस्य प्रारम्भिकचरणे एव सर्वप्रथमं दशमकक्ष्यायाः प्रमाणपत्रम् अधिकृतं विद्यालयीय-विवरणं वा सङ्ग्रहीतव्यं यतो हि विधितः अयमेव सर्वाधिक-विश्वसनीयः साक्ष्यं मन्यते।

उच्चन्यायालयेन आरक्षि-महानिदेशकः निर्देशितः यत् इदम् अनिवार्यं परिपत्रं मार्गदर्शिका च आगामि- १५ अक्टूबर २०२६ दिनाङ्कात् पूर्वं राज्यस्य समेभ्यः आरक्षि-स्थानकेभ्यः, आरक्षि-अधीक्षकेभ्यः, अन्वेषण-प्रभारिभ्यश्च निर्गता भवेत्। एते निर्देशाः बिलासपुर-मण्डलस्य 'कोट-कहलूर' आरक्षि-स्थानके पञ्जीकृतस्य पोक्सो बलात्कार- सम्बद्धस्य च एकस्य प्रकरणस्य विचारणानन्तरं निर्गमिताः।

## प्रकरणस्य पृष्ठभूमिः-

### विद्यालयीय-प्रमाणपत्रस्य च उपेक्षा

विचारण- न्यायालयेन अभियुक्तः विंशति-वर्षस्य (२० वर्ष) कठोर-कारावास-दण्डेन दण्डितः आसीत्, यं विरुद्ध्य तेन उच्चन्यायालये याचिका प्रविष्टा। उच्चन्यायालये समीक्षा-काले प्रत्यक्षं जातं यत् अन्वेषणाधिकारिणा पीडितायाः वयसः प्रमाणार्थं प्राथमिकः वैधानिक-दृष्ट्या च सुदृढः आधारः- तस्याः दशम-कक्ष्यायाः विद्यालय-प्रमाणपत्रप्रलेखेषु समाविष्टम् एव नासीत्। आरक्षिविभागेन केवलं ग्रामपञ्चायतस्य जन्म-प्रमाणपत्रस्य आधारेण अभियोगः विनिर्मितः, येन तान्त्रिकदोषैः सम्पूर्णप्रकरणस्य दुर्बलीभवनस्य अभियुक्तस्य च विमुक्तेः सङ्कटः समुत्पन्नः। उच्चन्यायालयेन गम्भीरा चिन्ता व्यक्ता यत् अन्वेषणसंस्थानाम् एतादृश्याः मूलभूत- प्रमाद-कारणात् अनेकेषु जघन्य-अपराधेषु अपि अपराधिनः तान्त्रिक-त्रुटीनां लाभं प्राप्य मुक्ताः भवन्ति। न्यायालयेन दृढतया प्रतिपादितं यत् न्यायस्य वास्तविकम् उद्देश्यं सत्यस्य प्रकटीकरणम् अस्ति, न तु प्रक्रियागत-दोषैः अपराधिनः रक्षणम्।

# विश्व-ओजोन-दिवसे हरितधरायै
## डीपीएस बोकारोस्य अभिनवः प्रयासः — आकाशात् 'बीजगोलकानां' वर्षणम्




### सूर्यमन्दिरस्य समीपे ड्रोन-यन्त्रेण विशेषाभियानस्य सञ्चालनम्

**संवाददाता प्रेरकः च -सौरभः दे**

बोकारो। नीलाकाशे लहरन् डीपीएस बोकारो-विद्यालयस्य हरितध्वजः, अधश्च ड्रोन-यन्त्रेण क्रियमाणं 'बीजगोलकानां' वर्षणम् — विश्व-ओजोन-दिवसस्य (१६ सितम्बर) पावनावसरे दिल्ली-पब्लिक-स्कूल, बोकारो इत्यनेन पर्यावरण-संरक्षणस्य क्षेत्रे एकः अभिनवः, आधुनिकश्च उपक्रमः प्रस्तुतः।

विद्यालयस्य 'गो ग्रीन' अभियानस्य अन्तर्गतं पर्यावरण-स्वयंसेवकानां समर्पितेन छात्रदलने प्राचार्यस्य डॉ. ए. एस. गंगवार-महोदयस्य कुशलमार्गदर्शने सेक्टर-४ एफ्-स्थितस्य सूर्यमन्दिरस्य समीपवर्तिनि मुक्तप्रदेशे ड्रोन-यन्त्रस्य साहाय्येन पञ्चशतोऽधिकानां बीजगोलकानां वर्षणं कृतम्। अनेन हरितीकरणस्य दिशि विद्यालयेन अभिनवः पन्थाः प्रदर्शितः। एतेषु बीजगोलकेषु निम्बः, शालः, पलाशः, महोगनी, अशोकः, अर्जुनः इत्यादीनां वृक्षाणां बीजानि स्थापितानि आसन्। हरितविस्तारस्य अस्मिन् अभिनवोपक्रमे छात्राणाम् उत्साहः विशेषतः दर्शनीयः आसीत्।

अभियानस्य समये प्राचार्यः डॉ. ए. एस. गंगवारः स्वयमपि ड्रोन-यन्त्रं सञ्चालयन् बीजगोलकानां वर्षणं कृतवान्। सः हस्ताभ्यामपि इतस्ततः बीजगोलकान् प्राक्षिपत्। द्वाभ्यां ड्रोन-यन्त्राभ्यां आकाशात् क्रियमाणं बीजगोलक-वर्षणस्य मनोहरं दृश्यं द्रष्टुं समीपस्थाः जनाः अपि कौतूहलेन बहुसंख्यया समागताः। पर्यावरण-संरक्षणस्य प्रभावी साधनं 'बीजगोलकम्' 'बीजगोलकः' न केवलं साधारणः मृत्तिकागोलकः, अपितु पर्यावरण-संरक्षणस्य प्रभावी प्राकृतिकोपायः अस्ति। मृत्तिका, गोमयजन्या प्राकृतिकखादः तथा स्थानीयवृक्षाणां बीजानि — एतेषां सम्यग्मिश्रणेन बीजगोलकाः निर्मीयन्ते। ततः ते छायायां शोषयित्वा बंजरभूमौ, दुर्गमप्रदेशेषु वा प्रक्षिप्यन्ते। वृष्टेः जलकणैः मृदा आर्द्रा भूत्वा मृद्वीभवति। ततः बीजगोलकेषु निहितानि बीजानि अङ्कुरितानि भूत्वा शनैः शनैः पादपत्वं प्राप्नुवन्ति। अनेन बंजरभूमौ हरितावरणस्य विस्तारः भवति, जैवविविधता च संवर्ध्यते। तत्सह वन्यजीवानां कृते प्राकृतिक-आहारस्य स्रोतः अपि सुलभतया निर्मीयते।

प्राचार्यः डॉ. गंगवारः — 'ओजोनमण्डलस्य संरक्षणमेव जीवनस्य संरक्षणम्'

विश्व-ओजोन-दिवसस्य महत्त्वं प्रकाशयन् प्राचार्यः डॉ. ए. एस. गंगवारः अवदत् — "पृथिव्याः सुरक्षा-कवचत्वेन मानितस्य ओजोनमण्डलस्य क्षरणं निवारयितुं सम्पूर्णमानवजातेः नैतिकदायित्वम् अस्ति।"

अस्य वर्षस्य विषयः 'Global Action for a Cooler Planet', अर्थात् 'शीतलतरायै पृथिव्यै वैश्विकः प्रयासः', इत्यस्य उल्लेखं कुर्वन् सः अवदत् यत् ओजोनमण्डलं सूर्यस्य हानिकारकाभ्यः पराबैंगनी-किरणेभ्यः समस्तस्य जीवजगतः संरक्षणं करोति।

ओजोनमण्डलस्य संरक्षणेन सह पर्यावरणानुकूलानां स्थायि-शीतलीकरण-प्रौद्योगिकीनाम् अवलम्बनमपि आवश्यकम् अस्ति। "वृक्षाः पादपाश्च अस्माकं पृथिव्याः प्राकृतिकाः वातानुकूलकाः सन्ति। यदि वर्धमानतापमानात् जलवायु-परिवर्तनाच्च अस्माभिः पृथिव्याः संरक्षणं करणीयं तर्हि अधिकाधिकं वृक्षारोपणमेव स्थायि-समाधानस्य प्रमुखः उपायः," इति प्राचार्यः उक्तवान्।






# विज्ञानं मानवजीवनं च

भगवतः सृष्टौ मानवः एकः विवेकशीलः प्राणी अस्ति। मानवे अनुसन्धानबलेन नवनववस्तूनाम् आविष्कारं कर्तुं सामर्थ्यम् अस्ति। विज्ञानस्य आविष्कारः एव अस्य प्रमाणम् अस्ति। गृहे एव स्थित्वा अद्य मानवः विश्वस्य सर्वाणि दृश्यानि अवलोकयति, विभिन्नक्षेत्रेषु संघटिताः वार्ताः श्रोतुं, द्रष्टुं च शक्नोति। स्वानुभवं च अन्येभ्यः वितरितुं शक्नोति। सर्वमेतत् विज्ञानस्यैव चमत्कारः अस्ति। कुत्रापि गन्तव्यञ्चेत् यथेच्छं वाहनम् उपलब्धम् अस्ति, शीघ्रं गन्तव्यञ्चेदपि आकाशमार्गीयवाहनस्यापि सौविध्यम् अस्ति। विज्ञानं नाम मानवस्य दैनन्दिनव्यवहारस्य सुविधाजनकं साधनम् अस्ति।

अद्य यन्त्रप्रधानता वर्तते। कृषिकार्यादारभ्य सर्वाणि क्षुद्रबृहन्ति कार्याणि यन्त्रेणैव क्रियन्ते। अस्मात् कारणात् अद्य मानवः शनैः शनैः निष्कर्मी जायमानोऽस्ति, आलस्यप्रभावेण केवलं खाद्यरुचिकारणेन च शारीरिकरोगी अपि भवन् दृश्यते। अधिकौषधव्यवहारः, दिनचर्यानियमाभावः, रासायनिकौषधैः पुष्टस्य खाद्यस्य ग्रहणम् इत्यादिभिः कारणैः मानवस्य रोगीभवनं स्वाभाविकम् एव।

अद्य बहिः सुन्दरः दृश्यमानोऽपि अन्तः मानवः दीनहीनः जातः। धैर्यशक्तिः सहनशक्त्यादिकं च अन्तर्मनसः लुप्यमानम् अस्ति। अद्य मानवः कामक्रोधलोभमोहादिरिपूणां शिकारः भवन् अस्ति। दिनचर्या सह खाद्याभ्यासः सम्यक् न भवति चेत् मानवस्य जीवने दुःखीभवनं स्वाभाविकम्। अद्य मानवः सात्त्विकाहारविषये किमपि न जानाति। निर्बोधपशुप्राणिनां मांसं विना तस्मै भोजनं न रोचते। एवं खाद्यदोषकारणेन विश्वे कलहयुद्धातङ्कप्राकृतिकदुर्योगादीनां प्राबल्यम् अस्ति। तस्य विवेके अध्यात्मक्षेत्रस्य द्वारं कदापि उद्घाटितुं न शक्नोति, सः सदा सांसारिकविषयवासनायामेव लिप्तः तिष्ठति।

मानवजीवनस्य अन्तिमलक्ष्यं तु अतिमहत्त्वपूर्णम् अस्ति। एतेन सः स्वयमेव यथावत् ज्ञातुं शक्नोति, जगत्कारणं परमेश्वरं च प्राप्तुं शक्नोति। एतादृशं महामूल्यवत् जीवनम् अद्य मानवः विषयवासनायां निमज्जयित्वा नरकतुल्यं कृत्वा जगतः एव हानिं कुर्वन् दृश्यते। पापस्य अधिकं भारं पृथ्वीमाता सोढुं न शक्नोति। तस्मात् अद्य मानवस्य आचारलक्षणेन प्रलयस्य संकेतः दीयते इति।



# केपटाउन्-नगरे डा. प्रेमकुमारेण

## जलवायु-सङ्कट-निवारणाय बलं दत्तम्

### आपदः परं त्राणकार्यादग्रे गत्वा सङ्कटस्य पूर्व-मूल्याङ्कनं

### सुदृढा सज्जता चानिवार्या :— विधानसभाध्यक्षः

**पाटलीपुत्रम्/केपटाउन्। हिमसंस्कृवार्ताः राघव नाथ झा।** एकोनसप्ततितमे (६९) राष्ट्रमण्डल-संसदीय-सङ्घस्य (CPA) सम्मेलने बिहार-विधानसभायाः अध्यक्षः डा. प्रेमकुमारः 'जलवायु-अनुकूलन-सहनशीलता-संवर्धने संसदीय-नेतृत्वस्य भूमिका' इति विषये सभां सम्बोधितवान्। सः जलवायु-परिवर्तनं समग्र-मानवजात्या सम्बद्धां समानां विभीषिकां प्रतिपाद्य वैश्विके स्तरे सामूहिकस्य, न्यायसङ्गतस्य, समन्वितस्य च प्रयासस्य परमावश्यकताम् अबोधयत्। डा. कुमारः प्रत्यपादयत् यद् जलप्लवः, अनावृष्टिः (शुष्कता), चक्रवातः, वर्धमानम् उत्तापम् (तापमानम्), जलस्य अन्नस्य चासुरक्षा इत्याद्याभ्यः विपत्तिभ्यः मुक्तेः कृते केवलम् आपदः पश्चात् क्रियमाणं त्राण-साहाय्यमेव पर्याप्तं नास्ति। प्रत्युत सङ्कटस्य पूर्व-मूल्याङ्कनं, प्रारम्भिक-सूचना-प्रणाली, आपद्-निरोधिकायाः आधारभूत-संरचनायाः सुदृढीकरणञ्चात्यन्तम् अनिवार्यं वर्तते। तेन विकास-योजनासु जलवायु-अनुकूलनाय प्राथमिकता-प्रदानस्य दृढम् आग्रहः कृतः।

सः जलवायु-न्यायस्य, जलवायु-वित्तस्य, तान्त्रिक-सहयोगस्य चावश्यकतां निर्दिशन् भारतस्य विविधानां पार्यावरणिक-प्रकल्पानाम् उल्लेखं कृतवान्। अनेन सहैव बिहार-विधानसभायां जलवायु-पर्यावरणयोः सञ्जातस्य दीर्घ-विचार-मन्थनस्य, तदनुसारेण प्रवर्तितायाः 'जल-जीवन-हरियाली' इत्याख्यायाः विशिष्ट-योजनायाः अपि चर्चा विहिता।

डा. कुमारेण जलवायु-संरक्षण-कार्याचरणे संसदां भूमिकां स्पष्टीकर्तुं पञ्च प्राथमिकाः अंशाः प्रदर्शिताः—

१. वैधानिक्याम् आय-व्ययक-प्रक्रियासु च जलवायु-अनुकूलनम्

२. वैज्ञानिक-मूल्याङ्कनाधारितं नीति-निर्माणम्

३. जलवायु-वित्तपोषणं तान्त्रिक-हस्तान्तरणञ्च

४. राष्ट्रमण्डल-देशानां मध्ये परस्परं संसदीय-सहयोगः

५. स्थानिकानां समाजानां महिलानाञ्च सक्रिया सहभागिता

अस्मिन् सम्मेलने जमैका-केन्या-युगाण्डा-पाकिस्तानप्रभृतीनां बहुविधानां देशानां प्रतिनिवृत्तयः समुपस्थिताः आसन्। अस्मिन् अवसरे जमैका-देशस्य संसदः अध्यक्षा जूलियट्-होल्नेस्-महोदया डा. प्रेमकुमारस्य भावपूर्णं स्वागतम् अकरोत्। डा. कुमारेणापि तस्यै अङ्ग्वस्त्रं समर्प्य तस्याः समादरः कृतः।



# स नो महान्

## राजते योऽनूचानः

न कञ्चुकेन न च विग्रहेण न सम्पदा नो खलु राजमानः  
स एव धन्यःप्रथितो धरायां स नो महान् राजते योऽनूचानः ।१।  
न वृद्धतालोहितकेशपाशैर्न चापि वित्तैर्बहुभिस्समग्रैः  
महान् स एव प्रथते विधाभिर्येनाऽधीतं सुविहितं हि शास्त्रैः ।२।  
न वाग्मिता केवलमत्र हेतुर्महान् स यो वेद विनिर्णयं हि  
तमोपहं शास्त्रमधीत्य सम्यग्ज्योतिर्मयं येन विभाव्यते हृदि ।३।  
यस्याऽन्तरे वर्तत एव विद्या स एव विद्वान् सुगुणं बिभर्ति  
यथा सरो वारिधरेण पूर्णं तथैव सोऽनूचनतां धिनोति ।४।  
न मेदिनीस्थैश्शिखरैःप्रमाणं न वाऽपि तुङ्गैस्सदनैःप्रधानम्  
स एव धीमान् वचनेऽपि प्रीतिर्यस्यानूचानेन वपुर्विभाति ।५।  
यो नित्यमभ्यस्यति वेदरीतिं संस्कुर्वते यो निजचित्तवृत्तिम्  
स एव लोके शुभकर्मचारी योऽनूचानोऽपि जगत्यां विचारी ।६।  
विद्यैव योऽन्तःपरिपाकमेति विनम्रतां याति च सर्वकालम्  
स एव धीरोऽनूचानःप्रशान्तस्तमेव मन्येऽहमतीव पूज्यम् ।७।

**रचयिता - आचार्यः डा.रुरुकुमारमहापात्रः**  
**राष्ट्रियसंस्कृतविश्वविद्यालयः,तिरुपतिः**

## संस्कृत-कथा

"संस्कृतकथामञ्जरी" {१९}

## ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।

**"अथ ब्रह्मराक्षसोद्धारो नाम त्रयोदशोपाख्यानम्" (१)**

अथ पुनः समारोहणकामनया सिंहासनसमीपे विक्रममाणं भोजं सन्निरुध्य अन्या पुत्तलिका समवदत्- श्रृणु राजन्! एकदा विक्रमो राजा राज्यभारं मन्त्रिवर्गे निधाय, स्वयं योगिवेशेन पृथ्वीपर्य्यटनं कर्तुं प्रवृत्तः। ग्रामे एकरात्रं नयति, नगरे पञ्चरात्राणि गमयति। एवं परिभ्रमन्नेकदा नगरमेकमगमत्। तन्नगरसमीपस्थिते नदीतटे देवालयः एकः आसीत्। तस्मिन् देवालये सर्वे महाजनाः पौराणिकात् पुराणं श्रृण्वन्ति। राजाऽपि नद्यां स्नात्वा, देवालयं गत्वा, देवं नमस्कृत्य च महाजनसमीपे उपविष्टः। तस्मिन् समये पौराणिकः पुराणवाक्यानि पठति | तत् यथा-

**"यदि प्राप्यपकाराय देहोऽयं नोपयुज्यते।**  
**ततःकिं पोषणं तस्य प्रत्यहं क्रियते नृभिः।।"**

एवं पुराणकथनसमये काश्चित् वृद्धो ब्राह्मणः पत्न्या सह नदीमुत्तरन्, महापुरेण नीयमानो हाहाकारं कुर्वन् नदीमध्ये महाजनान् प्रति वदति- भो भो महात्मानः! धावध्वं धावध्वं वृद्धः सपत्नीकी ब्राह्मणोऽहं नदीप्रवाहेण बलात् नीयमानोऽस्मि। कोऽपि सत्वाधिको धार्मिकः मम सपत्नीकस्य जीवदानं करोतु। जलेनोह्यमानस्य इत्थं दीनध्वनिं श्रुत्वा महाजनाः सर्वेऽपि सकौतुकं पश्यन्ति, परं न कोऽपि नदीमध्ये प्रविश्य प्रवाहात् रक्षितुं तस्याभयं प्रयच्छति। ततो विक्रमो राजा "मा भैषोः" इति तस्याभयं दत्त्वा नदीमध्ये प्रविश्य, पत्न्या सह तं ब्राह्मणं महापूरादाकृष्य तटमानीतवान्।

ब्राह्मणोऽपि स्वस्थः सन् राजानमवदत्- भो महासत्त्व! ममैतच्छरीरं पूर्वं मातापितृभ्यामुत्पादितम्, इदानीं त्वत्सकाशात् द्वितीयं जन्म प्राप्तम। अतः प्राणदानात् महोपकारिणस्तव किमपि प्रत्युपकारं न करिष्यामि चेत्, तर्हि मम जीवितं व्यर्थं स्यात्।

तस्मात् गोदावर्य्युदकामध्ये द्वादश वर्षपर्य्यन्तं मन्त्रजपस्य मदीयं पुण्यं तुभ्यं दीयते। अन्यच्च- मम यत् कृच्छ्रचान्द्रायणादिना किमपि सुकृतमुपार्जितमस्ति, तत् सर्वं गृहाण इत्युक्त्वा स स्वपुण्यं राज्ञे समर्प्याशिषं दत्वा पत्न्या सह निजस्थानं गतः।

**डा. वर्षा प्रकाश टोणगांवकर**  
**पुणे / महाराष्ट्रम्**



# ग्रामीणानां मार्गाणां नियमित-निरीक्षणं श्रेष्ठतर-रक्षणाद्यञ्च सुनिश्चितं क्रियताम् :— मुख्यमन्त्री

- **मुख्यमत्रेण ग्रामीण-कार्य-विभागान्तर्गत-कार्यान्विताणां योजनानाम् कृता समीक्षा। ग्रामीण-मार्गाणां, सेतु-सेतुकिकानां, मूलभूतानां संरचनानाञ्च सम्बद्धानां सर्वासां योजनानां गुणवत्तानुरूपं समयबद्धतया च समापनस्य प्रदत्तः निर्देशः**
- **ग्रामीणानां क्षेत्राणां विकासः जनसुविधानाञ्च गतिप्रदानं राज्यसर्वकारस्य प्राथमिका वर्तते।**
- **जलप्लव-समये क्षतीकृतानां मार्गाणां सेतु-सेतुकिकानाञ्च मूल्याङ्कनं कृत्वा मरम्मत-कार्येषु तीव्रगतिः प्रदीयताम्, येनावागमनं सुगमं भवेत्।**
- **विभागान्तर्गत-सञ्चालिताः सर्वाः योजनाः प्राथमिकायाः आधारेण पूर्णताम् नीयताम्।**
- **ग्रामीणानां पथिभ्यः गुरु-यातायात-जनितात् विनाशात् रक्षणाय आवश्यकी व्यवस्था सुदृढा क्रियताम्।**

**पाटलीपुत्रम् : १५/०९/२०२६**
**हिमसंस्कृतवार्ताः राघव नाथ झा**

मुख्यमन्त्री सम्राट्-चौधरी लोकसेवक-आवासस्थिते 'सङ्कल्प-सगारगृहे' ग्रामीण-कार्य-विभागान्तर्गत-सम्पादित-योजनानां विस्तृतां समीक्षां कृतवान्। अस्मिन् अवसरे मुख्यमन्त्रिणा अधिकारिभ्यः गुणयुक्तेन रूपेण कार्यासमाने समापने च निर्देशः प्रदत्तः।

समीक्षायाः समये ग्रामीण-कार्य-विभागस्य सचिवः अभयकुमारसिंहः ग्रामीण-कार्य-विभागस्य अन्तर्गत-प्रवर्तितानां योजनानां भविष्यद्-योजनानाञ्च विषये प्रस्तुतीकरण-माध्यमेन विस्तृतं विवरणं प्रदत्तवान्। तेन मुख्यमन्त्री-ग्राम-सम्पर्क-योजना, मुख्यमन्त्री-ग्राम-सम्पर्क-योजना (अवशेष-भागाः), मुख्यमन्त्री-ग्रामीण-सेतु-योजना, सुलभ-सम्पर्कता-योजना, प्रधानमन्त्री-ग्राम-सडक-योजना इत्येतासां ग्रामीण-मार्गाणां सुदृढ़ीकरण-प्रबन्धनसम्बद्धानां च योजनानां विषये विस्तृतं प्रतिवेदनं प्रस्तुतम्।

समीक्षायाः समये मुख्यमन्त्रिणा अवोचि यद् ग्रामाणां विकासः जनसुविधानाञ्च वर्धनम् अस्माकं परमं लक्ष्यम् अस्ति। ग्रामीणक्षेत्रेषु मार्ग-निर्माणं, सेतु-निर्माणं, आधारभूतसंरचनानां तथा च ग्रामीण-कार्य-विभागसम्बद्धानाम् इतरेषां प्रकल्पानां गुणवत्तानुरूपं समयेनैव समापनेन ग्रामीणाः जनाः ससौकर्यं प्राप्नुवन्ति, तदैव च ग्रामीण-अर्थव्यवस्थायाम् अपि तीव्रगतिः सञ्चरति। अस्माकं सर्वकारः आरम्भाद् एव ग्रामीणानां क्षेत्राणां विकासं प्राथमिकं मन्यमानः कार्यरतोऽस्ति। ग्रामीण-मार्गाणां निर्माणाय रक्षणाय च राज्यसर्वकारेण विपुला राशिः व्ययीक्रियते। ग्रामेषु सुलभ-सम्पर्कता अक्षुण्णा तिष्ठेत्, तदर्थं ग्रामीण-कार्य-विभागः पथिभ्यः सततं निरीक्षणं कारयेत्। जलप्लव-काले विनाशितानां सेतु-सेतुकिकानां, मार्गाणां च मूल्याङ्कनं विधायाऽऽशु मरम्मत-कार्याणि समाप्यन्तां येन जनानाम् आवागमनं सुगमं स्यात्। ग्रामीण-कार्य-विभागस्य अन्तर्गतं स्वीकृताः सर्वा अपि योजनाः प्राथमिकायाः आधारेण पूर्यन्ताम्। तेन स्पष्टीकृतं यद् ग्रामीण-मार्गाणां परिपालनम् अत्यावश्यकम् अस्ति, तद् सर्वदा रक्ष्येत। ग्रामीण-मार्गाणां गुरु-यातायातात् (हेवी ट्रैफिक) रक्षणम् अपि अनिवार्यम्।

बैठकेऽस्मिन् ग्रामीण-कार्य-मन्त्री सुनीलकुमारः, मुख्यमन्त्रिणः प्रधानसचिवः दीपककुमारः, मुख्यसचिवः प्रत्यय-अमृतः, वित्तविभागस्य प्रधानसचिवः विनयकुमारः, मुख्यमन्त्रिणः सचिवः लोकेशकुमारसिंहः, ग्रामीण-कार्य-विभागस्य सचिवः अभयकुमारसिंहः, मुख्यमन्त्रिणः सचिवः सञ्जयकुमारसिंहः अन्ये च वरिष्ठ-धिकारिणः उपस्थिताः आसन्।

# अष्टादश-सितम्बर-दिनाङ्के जद-(यू)-दलस्य विधायकानां विधानपरिषद-सदस्यानाञ्च एकदिवसीयः प्रबोधन-कार्यक्रमः




## विधायि-दायित्वानां, विधि-निर्माणस्य, आय-व्ययकस्य (बजट्) बिहारस्य च अर्थव्यवस्थायाः समावेशेन पञ्चसु महत्त्वपूर्ण-विषयेषु भविष्यति गम्भीरं मन्थनम्

**पाटलीपुत्रम् : १६/०९/२०२५**
**हिमसंस्कृतवार्ताः राघव नाथ झा**

जनता-दल-(यूनाईटेड्)-दलस्य प्रदेश-कार्यालये दलस्य राष्ट्रिय-प्रवक्त्रा राजीव-रञ्जन-प्रसादेन एका अतीव महत्त्वपूर्णा पत्रकार-सङ्गोष्ठी (प्रेस-वार्ता) सम्बोधिता। अस्मिन् अवसरे सः आगामिनि अष्टादश-सितम्बर-दिनाङ्के दलेन समायोज्यमानस्य एकदिवसीय-प्रबोधन-कार्यक्रमस्य विषये वार्तानां कृते महत्त्वपूर्णं विवरणं प्रदत्तवान्। तेन निगदितं यद् अस्य कार्यक्रमस्य अवसरे प्रश्नोत्तरार्थम् अपि एकः पृथक् सत्र-प्रभागः संयोजयिष्यते।

तेनोक्तं यत् जनता-दल-(यूनाईटेड्)-दलेन आगामिनि अष्टादश-सितम्बर-दिनाङ्के प्रदेश-कार्यालयस्थे कर्पूरी-सभागारे दलस्य विधानसभा-सदस्यानां विधानपरिषद-सदस्यानाञ्च कृते एकदिवसीयः प्रबोधन-कार्यक्रमः आयोजयिष्यते। अस्य उपक्रमस्य प्रधानम् उद्दिश्यं विधानसभायां विधानपरिषदि च दलस्य जन-प्रतिनिधीनां वैधानिक-दायित्वं सातिशयं प्रभावशालि विधातुम्, तथा च राज्य-हिताय लोक-कल्याणाय च सम्बद्धानां विषयाणामुपरि सदने सार्थकस्य तथ्यपूर्णस्य च विचार-विनिमयस्य दृढीकरणम् अस्ति।

अस्य प्रबोधन-समारोहस्य समुद्घाटनं दलस्य राष्ट्रियाध्यक्षः नीतीश-कुमार-महोदयः करिष्यति। कार्यक्रमेऽस्मिन् दलस्य राष्ट्रिय-कार्यकारी-अध्यक्षः सञ्जयकुमारझा, उपमुख्यमन्त्री विजयकुमारचौधरी, उपमुख्यमन्त्री विजेन्द्रप्रसादयादवः, स्वास्थ्यमन्त्री निशान्तकुमारः, दलस्य प्रदेशाध्यक्षः उमेशसिंहकुशवाहा, जद-(यू)-विधायक-दलस्य नेता श्रवणकुमारः, सर्व एव मन्त्रिवर्याः, तथा च दलस्य विधानमण्डल-दलस्य समग्राः सदस्याः समुपस्थिताः भविष्यन्ति।

तेन संसूचितं यद् अस्मिन् कार्यक्रमे 'पीआरएस लेजिसलेटिव रिसर्च' इति संस्थायाः विद्वांसः विशेषज्ञाश्च विधातृभ्यः परिषद-सदस्येभ्यश्च तेषां विधायि-कर्तव्यानां, सदनस्य कार्य-प्रणाल्याः, तथा च नीति-विधि-निर्माण-सम्बद्धानां सूक्ष्माणाम् अंशानां सम्यक् ज्ञानं प्रदास्यन्ति। 'पीआरएस लेजिसलेटिव रिसर्च' भारते संसदः विधानमण्डलानाञ्च कृते निष्पक्षम् अनुसन्धानं वैधानिकीं साहाय्यताञ्च वितरन्ती एका प्रमुखा संस्था वर्तते। विविध-राज्यानां संसत्सदस्याः विधायकाश्च विधायि-नीति-विषयेषु गवेषणाय तथ्यानां सङ्कलनाय चास्याः संस्थायाः सेवानाम् उपभोगं कुर्वन्ति।

येषु पञ्चसु प्रमुख-विषयेषु सम्पात्स्यते विचार-विमर्शः:—

एकदिवसीय-प्रबोधन-कार्यक्रमस्य अन्तर्गते पञ्चसु मुख्य-विषयेषु विशेषज्ञैः सह विचार-विमर्शनं गभीर-मन्थनञ्च विधास्यते—

१. विधायि-दायित्वं समितयश्च
२. विधि-निर्माण-प्रक्रियायाः अवबोधः
३. भारते साम्प्रतिकाः विधायि-घटनाक्रमाः
४. राज्यस्य आय-व्ययकस्य (बजट्) अवगमनम्
५. बिहारस्य अर्थव्यवस्था राज्यस्य च वित्त-व्यवस्था

# प्रधानमन्त्रिणः नरेन्द्रमोदीमहाशयस्य षट्सप्ततितमे (७६) अवतरणदिवसे देशव्यापिकार्यक्रमाणां 'सेवासङ्कल्प-अभियानस्य' च आयोजनम्



**नवीदेहली 16 सितंबर 2026**
**हिमसंस्कृतवार्ताः- डॉ विमलेश झा**
भारतस्य यशस्वी प्रधानमन्त्री नरेन्द्रमोदी महाशयः आगामिनि सितम्बरमासस्य १७ दिनाङ्के षट्सप्ततितमे वर्षे प्रवेक्ष्यति। तस्य सार्वजनिक-जीवनस्य (मुख्यमन्त्रित्वेन प्रधानमन्त्रित्वेन च) पञ्चविंशतिवर्षाणि पूर्णानि सञ्जातानि। एतम् ऐतिहासिकम् अवसरं पुरस्कृत्य सितम्बर १७ दिनाङ्कतः अक्टूबर १७ दिनाङ्कं यावत् सम्पूर्णे भारते 'सेवासङ्कल्प-अभियानम्' चालयिष्यते। सप्टेम्बर १७ दिनाङ्कः 'सेवा-दिवसः' रूपेण आचर्यते, यस्मिन् देशव्यापीनि रक्तदानशिबिराणि आयोजयिष्यन्ते।
द्विचक्रिकायात्रा -गुजरातस्य वडनगरतः (प्रधानमन्त्रिणः जन्मस्थलात्) वाराणसीं प्रति तथा वाराणसीतः वडनगरं प्रति द्विमुखी द्विचक्रिकायात्रा प्रवर्तिष्यते। गृहमंत्री श्री अमित शाहः वडनगरात् अस्याः यात्रायाः शुभारम्भं करिष्यति। अस्यां यात्रायां प्रायः १००० युवानः १० राज्यानाम् १९३ मण्डलेभ्यः गमिष्यन्ति। दीपावली -मध्यप्रदेशस्य उज्जयिन्यां क्षिप्रानद्याः तीरे महाकाललोकक्षेत्रे च प्रायः पञ्चविंशतिलक्षं (२५,००,०००) मृत्तिकादीपाः प्रज्वालयिष्यन्ते।'आशीर्वादस्य दीपः' सायङ्काले षड्वादनात् सप्तवादनपर्यन्तं नागरिकैः स्वगृहेषु 'आशीर्वादस्य दीपः' प्रज्वालनीयः इति आह्वानं कृतम्।
दिव्याङ्गेभ्यः विद्युद्-द्विचक्रिका (स्कूटी) वितरणम्: हरियाणाराज्यस्य फरीदाबादक्षेत्रे मन्त्रिणा कृष्णपालगुर्जरेण दिव्याङ्गजनेभ्यः विद्युच्चालित-द्विचक्रिकाः वितरिष्यन्ते।

## जम्मूकाश्मीरे दीपोत्सवः- जम्मूकाश्मीरस्य विविधभागेषु ८.१ लक्षं दीपाः प्रज्वालयिष्यन्ते।

मुम्बईनगर्यां प्रकाशव्यवस्था 'सेवा फर्स्ट' चः -मुम्बईनगर्यां 'गेटवे आफ् इण्डिया' सहितं १० प्रमुखस्थानानि दीपमालाभिः अलङ्कृतानि भविष्यन्ति। स्टार्टअप-युवकेभ्यः 'सेवा फर्स्ट इनोवेशन चैलेञ्ज' आयोज्यते।
पश्चिमवङ्गे महती सभाः कोलकाता-नगरे प्रायः पञ्चाशत्-सहस्रं (५०,०००) अन्नपूर्णा-योजना-लाभार्थिनः एकत्रिताः भविष्यन्ति, यत्र प्रधानमन्त्री दृश्य-श्रव्य-माध्यमेन सम्बोधयिष्यति।वाराणस्यां कौशेय-कलाकृतिः: सर्वेशकुमार-श्रीवास्तवेन पारम्परिकया 'उचंद' कलया कौशेयतन्तुभिः प्रधानमन्त्रिणः मातुश्च हीराबेन-महोदयायाः भावपूर्णं चित्रं रचितम्। अपि च अक्टोबरमासस्य सप्तमे दिनाङ्के मण्डलमुख्यालयेषु 'सेवा-ज्योति-कलश-यात्रा' समायोज्य 'विकसित-भारतम् २०४७' इति सङ्कल्पः सुदृढो भविष्यति।

# बिहारस्य विकासे अभियन्तृणां (इञ्जिनीयर-वर्गाणां) महती भूमिका; अधुना नगरीकरणे आपत्-प्रबन्धने च निर्वोढव्या बृहती दायित्व-धुरा :— राज्यपालः



❑ राज्यपालोऽवदत्— 'अभियान्त्रिक-सेवायाः (इञ्जिनीयरिङ्ग सर्वोस्) एकीकरणस्य प्रस्तावः समीचीनः; राष्ट्रिय-सुरक्षातः आरभ्य विकसित-भारतस्य निर्माण-पर्यन्तम् अभियन्तृणां योगदानं महत्त्वपूर्णम्'

**पाटलीपुत्रम् : १५/०९/२०२६**
**हिमसंस्कृतवार्ताः राघव नाथ झा।** भारतरत्न-डा. मोक्षगुण्डम्-विश्वेश्वरय्या-महोदयस्य पञ्चषष्ट्यधिक-शततम-(१६५)-जयन्ती-समारोहे तथा च एकोनषष्टितमे (५९) अभियान्त्रिक-दिवस-समारम्भे (इञ्जिनीयर-दिवसे) समुपस्थितान् सम्बोधयन् राज्यपालः लेफ्टिनेण्ट्-जनरल् (निवृत्तः) सैयद-अता-हसनैन-महोदयः प्रत्यपादयत् यद् गतेषु वर्षेषु बिहारराज्ये विधि-व्यवस्थायाः आधारभूत-संरचनायाश्च (इन्फ्रास्ट्रक्चर) क्षेत्रे उल्लेखनीयं कार्यं सम्पन्नम् अस्ति। तेनोक्तं यत् पुरा गया-नगरीं गन्तुं पञ्चतः षड्-होराः (घण्टाः) यावत् समयः अपेक्ष्यते स्म, किन्तु अद्य जनाः प्रायः द्वयोः होरयोः एव तत्र सम्प्राप्नुवन्ति। राज्यस्य कस्मादपि प्रान्तात् षड्-होराभ्यन्तरे पाटलीपुत्र-सम्प्राप्तेः सङ्कल्पः पूर्णतां गतः। अस्मिन् सर्वाङ्गीण-विकासे अभियन्तृणां सातिशयं योगदानं वर्तते।'बिहार-अभियन्त्रण-सेवा-सङ्घस्य' (BESA) तत्त्वावधाने समायोजितेऽस्मिन् भव्य-समारोहे राज्यपालः न्यगादीत् यद् आगामिनि काले राज्ये तीव्र-नगरीकरणस्य महनीयं लक्ष्यं निर्धारितम् अस्ति। अस्मिन् कार्ये जानपद-अभियन्तॄणां (सिविल् इञ्जिनीयर्स्) भूमिका अतीव महत्त्वपूर्णा भविष्यति। बिहारस्य उर्वरा कृषिक्षेत्राणि नदीभ्यः प्रचुरं जलं प्राप्नुवन्ति, परञ्च एता एव नद्यः बहुवारम् आपदः विप्लवस्य च मूलकारणं भवन्ति। अतः जल-प्रबन्धने आपत्-नियन्त्रणे चापि अभियन्तृभिः प्रमुखा भूमिका निर्वोढव्या।तेन अभियान्त्रिक-सेवानाम् एकीकरणार्थं सङ्घस्य परामर्शं प्रशंसनीयं मन्यमानेनोक्तं यद् अभियन्तृणां कार्यं केवलं निर्माण-प्रक्रियासु एव सीमितं नास्ति, अपि तु राष्ट्रिय-सुरक्षायामपि तेषां साहचर्यम् अत्यावश्यकम् अस्ति। लद्दाख-क्षेत्रे २०२० तमे वर्षे चीन-देशेन सह उद्भूते संसक्त-तनाव-काले अभियन्तृभिः निर्मितानां मार्गाणां सेतूनां च साहाय्येनैव सैन्य-वाहनानि, बृहदाकाराः रथाः (टैङ्क), युद्ध-सामग्र्यश्च अग्रिम-सीमा-क्षेत्रेषु प्राप्ताः। सीमा-प्रदेशेषु मार्ग-निर्माण-कार्ये बिहारस्य कर्मठ-श्रमिकाणां योगदानम् अपि महत्तरम् अस्ति।
राज्यपालः पुनः प्रतिपादितवान् यद् बिहारस्य सुदृढानां मार्गाणां परिवहन-व्यवस्थायाश्च लाभः समग्राय राष्ट्राय सम्पद्यते। स्वल्पेनैव समयेन सेनायाः सामग्र्याश्च पूर्वोत्तर-राज्येषु सम्प्रापणेन राष्ट्रिय-सुरक्षा सुदृढा भवति। अभियन्तृणाम् आत्मविश्वासस्य तान्त्रिक-दक्षतायाश्च (Technical skills) सुफलम् उभयोः राज्य-राष्ट्रयोः संवर्धते। अनेनैव सामूहिक-प्रयासेन २०४७ तम-वर्षपर्यन्तं 'विकसित-भारतस्य' सङ्कल्पः सिद्धो भविष्यति।
बिहारराज्ये पर्यटन-विकासस्य विपुलाः सम्भावनाः सन्तीति संसूच्य तेनोक्तं यत् पर्यटन-केन्द्राणां समभिवृद्धये एकस्य प्रभावशालिनः प्राधिकारस्य (अथॉरिटी) रचनां कृत्वा अभीष्ट-परिणामाः प्राप्तुं शक्यन्ते। अस्मिन् सन्दर्भे सर्वकाराय समुचितः परामर्शः प्रदत्तः इत्यपि तेन विज्ञापितम्। अभियान्त्रिक-सुधार-आयोगस्य (इञ्जिनीयरिङ्ग रिफॉर्म कमिशन्) गठनस्य दृढा याचना'इण्डियन् इञ्जिनीयर्स् फेडरेशन्' इत्यस्य राष्ट्रियाध्यक्षः अविनाश-राउलः अवदत् यद् अभियन्तारः अहोरात्रं राष्ट्र-निर्माणे संलग्नाः सन्ति। तेन अभियान्त्रिक-सेवावर्गार्थं 'एकं राष्ट्रम्, एकः सेवा-नियमः' (One Nation, One Service Rule) इत्यस्य प्रवर्तनस्य तथा च बिहारे अभियान्त्रिक-सुधार-आयोगस्य संस्थापनायाः दृढं निवेदनं कृतम्।'बेसा' (BESA) इत्यस्य अध्यक्षः सुनीलकुमारः स्वागत-भाषणे सङ्घस्य क्रियाकलापान् प्रास्तौत्। महासचिवः राकेशकुमारः औद्योगिकीकरणस्य संवर्धनाय अभियान्त्रिक-आयोगं सङ्घव्य मण्डलशः (जिल्लावार) औद्योगिक्याः आवश्यकतायाः अध्ययनस्य परामर्शं प्राददात्। सः नूतनान् अभियन्तॄन् निर्माण-कार्येषु गुणवत्तां प्रति कदापि शिथिलाः न भवेयुरिति समाहूतवान्। तेन निगदितं यद् बिहारे सम्प्रति प्रतिमण्डलं कश्चन अभियान्त्रिक-महाविद्यालयः विद्यते, राज्ये च आहत्य अष्टत्रिंशत् (३८) अभियान्त्रिक-महाविद्यालयानां सद्भावः परमस्य गौरवस्य विषयः अस्ति। तेनापि याचितं यत् केन्द्रस्य इव राज्येऽपि लोकसेवा-आयोगेन नियुक्तानां सहायक-अभियन्तृणां पदनाम 'सहायक-कार्यपालक-अभियन्ता' इति विधीयताम्।